

# केन्द्रीयसंस्कृतविश्वविद्यालयः
(संसदः अधिनियमेन स्थापितः)

## श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

# कौटिल्यस्य "अर्थशास्त्रम्"
## इति ग्रन्थम् अधिकृत्य सप्तदिनव्यापिनी हैमन्तीयकार्यशाला चिन्तनगोष्ठी च

क्रोधि-पुष्य-शुद्ध तृतीयातः क्रोधि-पुष्य-शुद्ध नवमीं यावत्



आचार्यः श्रीनिवासवरखेडीवर्यः, कुलपतिः
संरक्षकः



आचार्यः हंसधर झा
निदेशकः



आचार्यः चन्द्रकान्तः
सहनिदेशकः



आचार्यः हरिप्रसादः के.
संयोजकः



डा. वेङ्कटरमणभट्टः
सहसंयोजकः



डा. रवीशः एन्.
सहसंयोजकः

A Seven Day National Level Winter Workshop on

# Arthashastra of Kautilya

06-01-2025 - 12-01-2025

## कौटिल्यस्य अर्थशास्त्रम्

राष्ट्रं नः प्राणाः इत्यादिवाक्येभ्यः राष्ट्रभक्तिः प्रतीयते । किमपि राष्ट्रं विकसितं प्रवृद्धञ्च भवितुं तद्राष्ट्रस्य सामाजिकार्थिकराजनैतिकप्राशासनिकक्षेत्रं सुदृढं भवेत् । राष्ट्रस्य सर्वतोमुखविकासाय स्वरूपचिन्तनं सर्वादौ करणीयम् । कृतस्य चिन्तनस्य नेतृभिः शासकैश्च क्रियान्वयनं कर्तव्यम् । राष्ट्रविकासाय प्रजानां हिताय च कौटिल्यप्रणीते अर्थशास्त्रे बहवो हि विचाराः समुपनिबद्धाः सन्ति । अर्थशास्त्रं हि पूर्वाचार्यैर्भारतदेशस्य सुखशान्तिसमृद्धये त्रिवर्गोन्नतये च निर्माय राष्ट्रस्य पुरतः समुपस्थापितम् । आचार्यः कौटिल्यः कृत्स्नम् अर्थशास्त्रं वेदञ्चाधीत्य वैदिकमर्यादया लोकयात्रासाधनत्वञ्चानुभूय तत्सङ्ग्रहात्मकमेकम् अर्थशास्त्रं प्रणीतवान् । तदर्थमुपजीव्य रामराज्यं धर्मराजराज्यं चन्द्रगुप्तमौर्यराज्यं च स्वर्णयुगायते । तदिदमर्थशास्त्रं पञ्चदशाधिकरणं सार्धशताध्यायं साशीतिप्रकरणशतं षट्सहस्रश्लोकात्मकमुपलभ्यते । शास्त्रेऽस्मिन् प्रतिपाद्यो विषयः अर्थः । मनुष्यवती भूमिः अर्थ इति तन्त्रयुक्तौ कौटिल्येनाभिहितम् । मनुष्याणां वृत्तिरर्थः मनुष्यवती भूमिरित्यर्थः । तस्या अर्जनं रक्षणं सत्पात्रप्रतिपत्तिश्च कर्तव्या भवति । धर्मकामौ अर्थमूलौ भवतः । धर्मात् अर्थः अर्थतः कामः इति वचसा केचित् त्रिवर्गमपि अर्थत्वेन अर्थे अन्तर्भावयन्ति । तस्य अर्थस्य विधायकं शासनं यत्र तदर्थशास्त्रमिति व्यपदिश्यते ।

## कार्यशालाविषये वाक् मनागिव

इदम् अर्थशास्त्रं बहुत्र अध्ययनाध्यापनाय पाठ्यक्रमे न समुपस्थापितम् । भारतदेशस्य माननीयानां प्रधानमन्त्रिणां श्रीमतां नरेन्द्रमोदीवर्याणां २०४७ विकसितभारतकल्पनारूपः महान् स्वप्नः वर्तते । तत्स्वप्नसाकाराय भारतीयानामस्माकं समेषामपि योगदानं नितान्तमपेक्षितम् । तदर्थं शिक्षितैः लोकैः सर्वात्मना चिन्तनं विधानीयम् । अद्यतनच्छात्राः श्वस्तननागराः भविष्यन्तीति वचनं सर्वविदितम् । एतादृशराष्ट्रहितचिन्तनाय सङ्गोष्ठ्यः कार्यशालाः चिन्तनगोष्ठ्यश्च माध्यमत्वेन स्थानमावहन्ति । अस्माकं केन्द्रीयसंस्कृतविश्वविद्यालयस्य आदेशेन शृङ्गेरीस्थश्रीराजीवगान्धीपरिसरे ०६-०१-२०२५ तः १२-०१-२०२५ पर्यन्तं कौटिल्यस्यार्थशास्त्रमधिकृत्य साप्ताहिकी हैमन्तीयकार्यशाला चिन्तनगोष्ठी च समायोजिता अस्ति । अस्यां कार्यशालायां त्रिंशत्यधिकच्छात्राः देशस्य विविधेभ्यः प्रदेशेभ्यः भागग्रहणाय समागमिष्यन्ति । छात्रान् एतान् बोधयितुं बाह्यमहाविद्यालयेभ्यः विश्वविद्यालयेभ्यश्च प्रथितयशस्काः नानाशास्त्रेषु कृतश्रमाः आचार्याः समायास्यन्ति ।

## उद्धेश्यानि

1) कौटिल्यस्य अर्थशास्त्रविषये जागृत्युत्पादनम् ।
2) अर्थशास्त्रे प्रतिपादितविचाराणां प्रासंगिकतायाः बोधः ।
3) विकसितभारतकल्पनाय अर्थशास्त्रे प्रतिपादिततत्त्वानां मूल्यानाञ्च योगदानमधिकृत्य चिन्तनम् ।
4) देशस्य प्राशासनिकक्षेत्रे वर्तमानानां जनानां कृते अर्थशास्त्रे प्रतिपादितकर्तव्याधिकारयोः विषये विद्यमानसिद्धान्तानां चिन्तनम् ।
5) विश्वविद्यालयेषु पाठ्यक्रमे अर्थशास्त्रं समग्ररूपेण प्रवेशयितुं विचारविनिमयः ।

## पञ्जीकरणप्रक्रिया

- कार्यशालायाः निमित्तं पञ्जीकरणाय निश्चितेभ्यः महाविद्यालयेभ्यः गूगल फार्म प्रेषयिष्यते ।
- तत्तन्महाविद्यालयस्य अधिकारिभिः/प्रमुखैः सूचिताः एव छात्राः पञ्जीकरणं कुर्युः ।
- विश्वविद्यालयस्य नियमानुगुणं अन्यराज्यस्थसंस्थाभ्यः दश छात्राः, कर्नाटकस्य संस्थाभ्यः १० छात्राः परिसरीयाः दश छात्राः चेति आहत्य ३० एव छात्राणां कृते भागग्रहणाय अवसरः अस्ति ।
- परिसरे दशभ्यः छात्रेभ्यः अपि अधिकाः छात्राः प्रविविक्षन्ति चेत् वाक्परीक्षां कृत्वा चयनं करिष्यते ।

## कार्यशालायाः स्वरूपम्

- कार्यशाला ०६-०१-२०२५ तः १२-०१-२०२५ दिनाङ्कपर्यन्तं प्रचलिष्यति ।
- प्रतिदिनं प्रातः १०.०० वादनतः सायं ५.०० वादनपर्यन्तं प्रचलिष्यति ।
- प्रतिदिनं चत्वारि व्याख्यानसत्राणि चिन्तनगोष्ठीसहितानि भविष्यन्ति ।
- व्याख्यानाय बाह्याः सप्त विषयविशेषज्ञाः आहूताः सन्ति ।
- कार्यशालायाः आरम्भे ०६-०१-२०२५ दिनाङ्के प्रातः १०.०० वादने प्राक्-परीक्षा भविष्यति ।
- अन्तिमे दिने १२-०१-२०२५ तमे दिनाङ्के अपराह्णे अन्तिमपरीक्षा भविष्यति, यदाधारेण प्रमाणपत्रे ग्रेड-व्यवस्था अपि भविष्यति ।
- उद्घाटनसत्रे कुलपतीनाम् उद्बोधनम्, श्रीमतां हेच्.वि.नागराजराववर्याणाम् आशयभाषणं च भविष्यति ।

## पाठ्यांशाः

कौटिल्यस्य अर्थशास्त्रे २४ अध्यायाः ।

## मुख्याः तिथयः

| | | |
|---|---|---|
| छात्राणां पञ्जीकरणाय अन्तिमदिनाङ्कः | - | १५-१२-२०२४ |
| कार्यशालायाः उद्घाटनम् | - | ०६-०१-२०२५ |
| कार्यशालायाः समापनम् | - | १२-०१-२०२५ |

# भागग्राहिभ्यः सूचनाः

**व्यवस्थासम्बद्धाः -**

- भागग्राहिभ्यः छात्रेभ्यः छात्रावासे निश्शुल्का वासभोजनव्यवस्था कल्पयिष्यते ।
- प्रत्येकं प्रतिभागिने १- शय्या, १- प्रच्छदपटः, १- कम्बलम् , १ – उपधानञ्च दास्यते, न तु ततोधिकम् ।
- शीतकालः इति कारणतः ऊर्णवस्त्रम् अतिरिक्तं कम्बलं(अपेक्षायां सत्याम्) च प्रतिभागिनः स्वयमेव आनयेयुः ।
- प्रतिदिनं प्रातः ८.०० वादने प्रातराशः, मध्याह्ने १.०० वादने माध्याह्निकं भोजनम्, रात्रै ८.०० वादने भोजनम् च बालकच्छात्रावासस्य उपरितने प्राङ्गणे व्यवस्थापयिष्यते ।
- प्रतिदिनं पूर्वाह्ने ११.२५ वादने चायपानम्, अपराह्ने ३.४५ वादने सभर्जकं चायपानं च सभाङ्गणे एव व्यवस्थापयिष्यते ।
- प्रतिदिनं कार्यशालायां प्रातः योगकक्ष्या भविष्यति यत्र भागग्रहणम् अनिवार्यमस्ति ।
- परिसरे कार्यदिवसेषु एव कार्यशाला प्रचलिष्यति इत्यतः अनुशासनस्य पूर्णरूपेण पालनं कर्तव्यम् ।
- छात्रावासे वासादिव्यवस्था कल्पयिष्यते इत्यतः छात्रावासीयनियमाः पालनीयाः ।
- अभद्रव्यवहारः दण्डार्हः वर्तते, परिणामतः कार्यशालायाः मध्ये एव निष्कासनं भवितुमपि अर्हति ।

**शैक्षिकाः –**

- १००% उपस्थितिः अनिवार्या ।
- प्रतिदिनं व्याख्यानसत्रेषु व्याख्यातुरागमनात्पूर्वमेव उपस्थातव्यम् ।
- व्याख्यानानि सर्वाणि संस्कृतमाध्यमेन एव भविष्यन्ति ।
- प्रतिसत्रं व्याख्यातविषयेषु टिप्पण्यः लेखनीयाः ।
- परिचर्चासमये जिज्ञासाः उन्मुक्तरूपेण व्यक्तीकर्तव्याः, अनुचिताश्च प्रश्नाः न प्रष्टव्याः ।
- व्याख्यातविषयेषु अतिरिक्तकाले प्रतिभागिनः चिन्तनं, मननं, परिचर्चां, विशेषाध्ययनं, प्रस्तुतिं च कुर्युरिति अपेक्षा ।

## व्याख्यातारः



**आशयभाषणकर्तारः**

श्रीमन्तः प्रो.हेच्.वि.नागराजरावमहाभागाः
राष्ट्रपतिपुरस्कृताः संस्कृतविद्वांसः
प्राच्यविद्याशोधकेन्द्रम्, मैसूरु



प्रो. टि. वि.सत्यनारायणमहाभागाः
निवृत्ताः उपनिदेशकाः,
प्राच्यविद्याशोधसंस्था



प्रो. गङ्गाधरभट्टमहाभागाः
निवृत्तप्राध्यापकाः
महाराजसंस्कृतमहापाठशाला, मैसूरु



प्रो. के.के. शैन् महाभागाः
निदेशकाः,
के.सं.वि, गुरुवायूरुपरिसरः



प्रो. आर्. बालाजिमहाभागाः
शिक्षाविभागसमन्वयकाः
के.सं.वि, राजीवगान्धीपरिसरः



डा. श्रीधर भट्टमहाभागाः
संस्कृतविभागाध्यक्षाः
एस्.डि.एम्. महाविद्यालयः,उजिरे



डा.शशिकिरण बि.एन्.महाभागाः
सम्पादकाः,
“प्रेक्षा”, अन्तर्जालीयपत्रिका



डा. रामकृष्ण पेजत्तायमहाभागाः
सहाचार्याः, मानविकविद्याशाखा
चाणक्यविश्वविद्यालयः, बेङ्गळूरु



डा.महेश काकत्करमहाभागाः
संस्कृतप्राध्यापकाः
जि.जे.सि. शृङ्गेरी